भीष्म उवाच ॥ जगत्प्रभुं देवदेवमनंतं पुरुषोत्तमं ॥ स्तुवन्नामसहस्रेण
पुरुषः सततोत्थितः ॥ तमेव चार्चयन्नित्यं भक्त्या पुरुषमव्ययं ॥ ध्याय
न्स्तुवन्नमस्यंश्च यजमानस्तमेव च ॥ ७ ॥ अनादिनिधनं विष्णुं सर्वलो
कमहेश्वरं ॥ लोकाध्यक्षं स्तुवन्नित्यं सर्वदुःखातिगो भवेत् ॥ ८ ॥ ब्रह्म
ण्यं सर्वधर्मज्ञं लोकानां कीर्त्तिवर्धनं ॥ लोकनाथं महद्भूतं सर्वभूतभवोद्भ
वं ॥ ९ ॥ एष मे सर्वधर्माणां धर्मोधिकतमो मतः ॥ यद्भक्त्या
पुंडरीकाक्षं स्तवैरर्चैन्नरः सदा ॥ १० ॥ परमं यो महत्तेजः परमं यो मह

तपः॥ परमंयोमहद्ब्रह्मपरमंयःपरायणं॥११॥ पवित्राणांपवित्रंयोमं
गलानांचमंगलं॥ दैवतंदेवतानांचभूतानांयोव्ययःपिता॥१२॥ य
तःसर्वाणिभूतानिभवंत्यादियुगागमे॥ यस्मिंश्चप्रलयंयांतिपु
नरेवयुगक्षये॥१३॥ तस्यलोकप्रधानस्यजगन्नाथस्यभूपतेवि
ष्णोर्नामसहस्रंमेशृणुपापभयापहं॥१४॥ यानिनामानिगौ
णानिविख्यातानिमहात्मनः॥ ऋषिभिःपरिगीतानितानिव
क्ष्यामिभूतये॥१५॥ ऋषिर्नाम्नांसहस्रस्यवेदव्यासोमहामुनिः

२

छंदोनुष्टुप्तथादेवोभगवान्देवकीसुतः॥१६॥ ॐअस्यश्री
विष्णोर्दिव्यसहस्रनामस्तोत्रमंत्रस्यश्रीभगवान्वेदव्यासऋषिः
अनुष्टुप्छंदः॥ श्रीकृष्णःपरमात्मादेवता॥ आत्मयोनिःस्व
यंजातइतिबीजं॥ देवकीनंदनःस्रष्टेतिशक्तिः॥ उद्भवःक्षोभ
णोदेवइतिमंत्रः॥ शंखभृन्नंदकीचक्रीतिकीलकं॥ त्रिसामा
सामगःसामेतिकवचं॥ शार्ङ्गधन्वागदाधरइत्यस्त्रं॥ ॐविश्वं

३

विष्णुर्वषट्कार इत्यंगुष्ठाभ्यां नमः ॥ अमृतांशूद्भवो भानुरिति
तर्जनीभ्यां नमः ब्रह्मण्यो ब्रह्मकृद्ब्रह्मेति मध्यमाभ्यां नमः सु
वर्णविंदुरक्षोभ्य इत्यनामिकाभ्यां नमः ॥ आदित्यो ज्योतिरा
दित्य इति कनिष्ठिकाभ्यां नमः ॥ शार्ङ्ग धन्वा गदाधर इति क
रतलकरपृष्ठाभ्यां नमः ॥ ॐ विश्वं विष्णुर्वषट्कार इति हृदयाय
नमः ॥ अमृतांशूद्भवो भानुरिति शिरसे स्वाहा ॥ ब्रह्मण्यो ब्र ३

ह्मकृद्ब्रह्मेति शिखायै वौषट् ॥ सुवर्णविंदुरक्षोभ्य इति कवचा
यहुं ॥ आदित्यो ज्योतिरादित्य इति नेत्रत्रयाय वौषट् ॥ शार्ङ्ग ध
धन्वा गदाधर इत्यस्त्रं ॥ इति न्यासः ॥ अथ ध्यानं ॥ ॐ शांता
कारं भुजगशयनं पद्मनाभं सुरेशं विश्वाधारं गगनसदृशं मे
घवर्णं शुभांगं ॥ लक्ष्मीकांतं कमलनयनं योगिभिर्ध्यान
गम्यं ॥ वंदे विष्णुं भवभयहरं सर्वलोकैकनाथम् ॥ ॐ विश्वं वि

४

संभुर्मह्यादिसंभुर्भविसंभुर्महेश्वरं ॥ अनेकरूपदैत्यांतं नमामि पुरु
षोत्तमः ॥ इति ध्यानं ॥ ओं विश्वं विष्णुर्वषट्कारो भूतभव्यभवत्
प्रभुः ॥ भूतकृद्भूतभृद्भावो भूतात्मा भूतभावनः ॥ १ ॥ पूतात्मा
परमात्मा च मुक्तानां परमां गतिः ॥ अव्ययः पुरुषः साक्षी क्षेत्र
ज्ञोऽक्षर एव च ॥ २ ॥ योगो योगविदां नेता प्रधानपुरुषेश्वरः
नारसिंहवपुः श्रीमान्केशवः पुरुषोत्तमः ॥ ३ ॥ सर्वः शर्वः ४

शिवः स्थाणुर्भूतादिर्निधिरव्ययः ॥ संभवो भावनो भर्ता प्रभवः
प्रभुरीश्वरः ॥ ३२ ॥ स्वयंभूः शंभुरादित्यः पुष्कराक्षो महास्वनः ॥ अ
नादिनिधनो धाता विधाता धातुरुत्तमः ॥ ३३ ॥ अप्रमेयो हृ
षीकेशः पद्मनाभोऽमरप्रभुः ॥ विश्वकर्मा मनुस्त्वष्टा स्थविष्ठः
स्थ विरो ध्रुवः ॥ ३४ ॥ अग्राह्यः शाश्वतः कृष्णो लोहिताक्षः प्रतर्दनः
प्रभूतस्त्रिककुब्धाम पवित्रं मंगलं परं ॥ ३५ ॥ ईशानः प्राणदः प्रा

५

ज्येष्ठः श्रेष्ठः प्रजापतिः ॥ हिरण्यगर्भो भूगर्भो माधवो मधुसूद

नः ॥ ३६ ॥ ईश्वरो विक्रमी धन्वी मेधावी विक्रमः क्रमः ॥ अनुत्त

मो दुराधर्षः कृतज्ञः कृतिरात्मवान् ॥ ३७ ॥ सुरेशः शरणं शर्मः वि

श्वरेता प्रजाभवः ॥ अहः संवत्सरो व्यालः प्रत्ययः सर्वदर्शनः ॥ अ

जः सर्वेश्वरः सिद्धः सिद्धिः सर्वादिरच्युतः ॥ वृषाकपिरमेया

यात्मा सर्वयोगविनिःसृतः ॥ ३९ ॥ वसुर्वसुमनाः सत्यः समात्मा सम्मि ५

तः समः अमोघः पुंडरीकाक्षो वृषकर्मा वृषाकृतिः ॥ ४० ॥ रुद्रो बहु

शिरो बभ्रुर्विश्वयोनिः शुचिश्रवाः ॥ अमृतः शाश्वतः स्थाणुर्व

रारोहो महातपाः ॥ ४१ ॥ सर्वगः सर्वविद्भानुर्विष्वक्सेनो जना

र्द्दनः ॥ वेदो वेदविदव्यंगो वेदांगो वेदवित्कविः ॥ ४२ ॥ लोका

ध्यक्षः सुराध्यक्षो धर्माध्यक्षः कृताकृतिः ॥ चतुरात्मा चतुर्व्यू

हश्चतुर्दंष्ट्रश्चतुर्भुजः ॥ ४३ ॥ भ्राजिष्णुर्भोजनं भोक्ता सहिष्णुर्ज

जगदादिजः ॥ अनघो विजयो जेता विश्वयोनिः पुनर्वसुः ॥ ४४ ॥ उपें
द्रो वामनः प्रांशुरमोघः शुचिरूर्जितः ॥ अतींद्रः संग्रहः सर्गो धृ
तात्मा नियमो यमः ॥ ४५ ॥ वेद्यो वैद्यः सदायोगी वीरहा माधवो
मधुः अतींद्रियो महामायो महोत्साहो महाबलः ॥ ४६ ॥ महाबुद्धि मा ४
महावीर्यो महाशक्तिर्महाद्युतिः ॥ अनिर्देश्यवपुः श्रीमान्मे
यात्मा महाद्रिधृक् ॥ ४७ ॥ महेष्वासो महीभर्त्ता श्रीनिवासः सतां

गतिः ॥ अनिरुद्धः सुरानंदो गोविंदो गोविदांपतिः ॥ ४८ ॥ मरीचिर्द
मनो हंसः सुपर्णो भुजगोत्तमः ॥ हिरण्यनाभः सुतपाः पद्मनाभः
प्रजापतिः ॥ ४९ ॥ अमृत्युः सर्वदृक्सिंहः संधाता संधिमान्स्थिरः ॥ ५०
अजो दुर्मर्षणः शास्ता विश्रुतात्मा सुरारिहा ॥ ५० ॥ गुरुर्गुरुतमो
धाम सत्यः सत्यपराक्रमः ॥ निमिषोऽनिमिषः स्रग्वी वाचस्पतिरुदार ति प
धीः ॥ ५१ ॥ अग्रणीर्ग्रामणीः श्रीमान्न्यायो नेता समीरणः ॥ सह

प्र

स्वयंभूर्हीविश्वात्मा सहस्राक्षः सहस्रपात ॥५२॥ आवर्त्तनो निवृत्तात्
मा संवृत्तः संप्रमर्दनः ॥ अहःसंवर्त्तको वह्निरनिलो धरणीधरः
॥५३॥ सुप्रसादः प्रसन्नात्मा विश्वधृग्विश्वभुग्विभुः ॥ सत्कर्त्ता स
त्कृतिः साधुर्जह्नुर्नारायणो नरः ॥५४॥ असंख्येयो प्रमेयात्मा वि
शिष्टः शिष्टकृच्छुचिः ॥ सिद्धार्थः सिद्धसंकल्पः सिद्धिदः सिद्धि
साधनः ॥५५॥ वृषाही वृषभो विष्णुर्वृषपर्वा वृषोदरः ॥ वर्द्धनो ७

वर्द्धमा[illegible]श्च विविक्तो श्रुतिसागरः ॥५६॥ सुभुजो दुर्द्धरो वाग्मी
महेन्द्रो वसुदो वसुः ॥ नैकरूपो बृहद्रूपः शिपिविष्टः प्रकाशनः
॥५७॥ ओजस्तेजो द्युतिधरः प्रकाशात्मा प्रतापनः ॥ ऋद्धः स्प
ष्टाक्षरो मंत्रः चंद्रांशुर्भास्करद्युतिः ॥५८॥ अमृतांशूद्भवो भा २
नुः शशिबिंदुः सुरेश्वरः ॥ औषधं जगतः सेतुः सत्यधर्मपरा
क्रमः ॥५९॥ भूतभव्यभवन्नाथः पवनः पावनो नलः ॥ काम

८

हाकामकृत्कांतः कामोकामप्रदः प्रभुः ॥ ६० ॥ युगादिकृद्युगावर्त्तोनै
कमायोमहाशनः ॥ अदृश्योव्यक्तरूपश्चसहस्रजिदनंतजित्
॥ ६१ ॥ इष्टोविशिष्टः शिष्टेष्टः शिखंडीनहुषोवृषः ॥ क्रोधहाक्रोध
कृत्कर्त्ताविश्वबाहुर्महीधरः ॥ ६२ ॥ अच्युतः प्रथितः प्राणः प्रा
णदोवासवानुजः ॥ अपांनिधिरधिष्ठानमप्रमत्तप्रतिष्ठितः ॥
॥ ६३ ॥ स्कंदः स्कंदधरोधुर्योवरदोवायुवाहनः ॥ वासुदेवोबृ

८

हद्भानुरादिदेवः पुरंदरः ॥ ६४ ॥ अशोकस्तारणस्तारः शूरः शौरि
र्जनेश्वरः ॥ अनुकूलः शतावर्त्तः पद्मीपद्मनिभेक्षणः ॥ ६५ ॥ प
द्मनाभोरविंदाक्षः पद्मगर्भः शरीरभृत् महर्द्धिरृद्धोवृद्धात्मा
महाक्षोगरुडध्वजः ॥ ६६ ॥ अतुलः शरभोभीमः समयज्ञोह
विर्हरिः ॥ सर्वलक्षणलक्षण्योलक्ष्मीवान्समितिंजयः ॥ ६७ ॥ वि
क्षरोरोहितोमार्गोहेतुर्दामोदरस्सहः ॥ महीधरोमहाभागोवे

९ गवानमिताशनः॥६८॥उद्भवःक्षोभणोदेवःश्रीगर्भःपरमेश्वर
ः॥करणंकारणंकर्त्ताविकर्त्तागहनोगुहः॥६९॥व्यवसायोव्यव
स्थानःसंस्थानःस्थानदोध्रुवः॥परर्द्धिःपरमस्पष्टःस्तुष्टःपु
ष्टःशुभेक्षणः॥७०॥रामोविरामोविरजोमार्गोनेयोनयोनयो
वीरःशक्तिमतांश्रेष्ठोधर्मोधर्मविदुत्तमः॥७१॥वैकुंठःपुरुषः
प्राणःप्राणदःप्रणवःपृथुःहिरण्यगर्भःशत्रुघ्नोव्याप्तोवायु ९

र्धोक्षजः॥७२॥ऋतुःसुदर्शनःकालःपरमेष्ठीपरिग्रहः॥उग्रः
संवत्सरोदक्षोविश्रामोविश्वदक्षिणः॥७३॥विस्तारःस्थावरःस्
थाणुःप्रमाणंबीजमव्ययं॥अर्थोनर्थोमहाकोशोमहा
भोगोमहाधनः॥७४॥अनिर्विण्णःस्थविष्ठोभूर्धर्मयूपो
महामखः॥नक्षत्रनेमिर्नक्षत्रीक्षमःक्षामःसमीहनः॥७५॥
यज्ञइज्योमहेज्यश्चक्रतुःसत्रंसतांगतिः॥सर्वदर्शीविमु

१०

ज्ञात्मा सर्वज्ञो ज्ञानमुत्तमं ॥ ७६ ॥ सुव्रतः सुमुखः सूक्ष्मः सुघो
षः सुखदः सुहृत् ॥ मनोहरो जितः क्रोधो धीरो वीरो वाहुविदारणः
॥ ७७ ॥ स्वापनः स्ववशो व्यापी नैकात्मानेककर्महृत् ॥ वृत्त
रो वामिलो वक्षोरत्नगर्भो घनेश्वरः ॥ ७८ ॥ धर्मयूप धर्महेतुर्मी ५
मदस्सुश्वरमक्षरं ॥ अविज्ञाता महहृतां श्रुविधातालक्षलक्ष
णः ॥ ७९ ॥ गर्भसिनेमिः सत्यस्थो मिंहोभस्तमहेश्वरः ॥ ८० ॥

आदिदेवो महादेवो देवो देवोश देवमस्कृतः ॥

१०

उग्रोग्रो गोपतिर्गोप्ता ज्ञानगम्यः पुरातनः ॥ शरीरभर्ता नभष्टद्वो लोकाभ
पीड्वोभरद्विद्विक्षितः ॥ ८१ ॥ सोमसूर्यो मृत्युपः सोमः पुरुजित्पुरुषो
त्तमः ॥ विनयो जयः सत्यसंधो दामार्हः स्रावृतांपति ॥ ८२ ॥ जी
वो विनयिता साक्षी सकुंदो मितिविक्रमः ॥ अंभोनिधिरनंता
त्मा महोदधिः शयोंतकः ॥ ८३ ॥ अज्ञो महार्हः स्वात्मा स्वयमजि
तामित्रं प्रमोदनः ॥ आनंदो नंदनो नंदः सत्यधर्मा त्रिविक्र

मः ॥ ५४ ॥ महर्षिः कपिलाचार्यः कृतज्ञो मेदिनीपतिः ॥ त्रिपदस्त्रि
दशाध्यक्षो महाशृंगः कृतांतकृत ॥ ५५ ॥ महावराहो गोविं
दः सुषेणः कनकांगदी ॥ गुह्यो गंभीरो गहनो गुप्तश्चक्रग
दाधरः ॥ ५६ ॥ वेधाः स्वांगोऽजितः कृष्णो दृढः संकर्षणोऽच्युतः
वरुणो वारुणो वृक्षः पुष्कराक्षो महामनः ॥ ५७ ॥ भगवान्भ
गहानंदी वनमाली हलायुधः ॥ आदित्यो ज्योतिरादित्यः

॥११॥

सहिष्णुर्गतिसत्तमः ॥ ५८ ॥ सुधन्वा खंडपरशुर्दारुणो द्रविणप्रदः
दिविस्पृक् सर्वदृग्व्यासो वाचस्पतिरयोनिजः ॥ ५९ ॥ त्रिसामा
सा मगः साम निर्वाणं भेषजं भिषक् ॥ संन्यासकृच्छमः शांतो नि
ष्ठाशांतिः परायणः ॥ ६० ॥ शुभांगः शांतिदः स्रष्टा कुमुदः कुव
लेशयः ॥ गोहितो गोपतिर्गोप्ता वृषभाक्षो वृषप्रियः ॥ ६१ ॥
अनिवर्ती निवृत्तात्मा संक्षेप्ता क्षेमकृच्छिवः ॥ श्रीवत्सवक्षाः

श्रीवासः श्रीपतिः श्रीमतांवरः ॥ ६२ ॥ श्रीदः श्रीशः श्रीनिवासः
श्रीनिधिः श्रीविभावनः ॥ श्रीधरं श्रीकरः श्रेयः श्रीमांल्लोकत्र
याश्रयः ॥ ६३ ॥ स्वक्षः स्वंगः शतानंदो नंदिर्ज्योतिर्गणेश्वरः
विजितात्माविधेयात्मा सत्कीर्त्तिः छिन्नसंशयः ॥ ६४ ॥ उदीर्णः
सर्वतश्चक्षुरनीशः शाश्वतः स्थिरः ॥ भूशयो भूषणो भूति
र्विशोकः शोकनाशनः ॥ ६५ ॥ अर्चिष्मानर्चितः कुंभो विशु



द्धात्मा विशोधनः ॥ अनिरुद्धोऽप्रतिरथः प्रद्युम्नोऽमितविक्रमः ॥ ६६ ॥
कालनेमिनिहा वीरः शूरः शौरिर्जनेश्वरः ॥ त्रिलोकात्मा त्रिलो
केशः केशवः केशिहा हरिः ॥ ६७ ॥ कामदेवः कामपालः कामी कां
तः कृतागमः ॥ अनिर्देश्यवपुर्विष्णुर्वीरोऽनंतो धनंजयः ॥ ६८ ॥
ब्रह्मण्यो ब्रह्मकृद्ब्रह्मा ब्रह्म ब्रह्मविवर्द्धनः ॥ ब्रह्मविद्ब्राह्मणो
ब्रह्मी ब्रह्मज्ञो ब्राह्मणप्रियः ॥ ६९ ॥ महाक्रमो महाकर्मा महाते

१२

जोमहोरगः ॥ महाक्रतुर्महायज्वामहायज्ञोमहाहविः ॥ १०० ॥ स्त
व्यःस्तवप्रियस्तोत्रंस्तुतिस्तोतारणःप्रियः ॥ पूर्णःपूरयितापुण्यःपु
पुण्यकीर्त्तिरनामयः ॥ १०१ ॥ मनोजवस्तीर्थकरोवसुरेतावसु प्र
दः ॥ वसुप्रदोवासुदेवोवसुर्वसुमनाहविः ॥ १०२ ॥ सद्गतिःसत्कृतिः
सत्तासद्भूतिःसत्परायणः ॥ शूरसेनोयदुश्रेष्ठःसन्निवासःसु
यामुनः ॥ १०३ ॥ भूतावासोवासुदेवोसर्वासुनिलयोनलः ॥ द

१३

र्पहादर्पदोदृप्तोदुर्द्धरोथापराजितः ॥ १०४ ॥ विश्वमूर्त्तिर्महामूर्त्तिर्दी
प्तमूर्त्तिरमूर्त्तिमान् ॥ अनेकमूर्त्तिरव्यक्तःशतमूर्त्तिःशताननः ॥ १०५ ॥
एकोनैकःसवःकःकिंयत्तत्पदमनुत्तमं ॥ लोकबंधुर्लोकनाथो
माधवोभक्तवत्सलः ॥ १०६ ॥ सुवर्णवर्णोहेमांगोवरांगश्चंदनां
गदी ॥ वीरहाविषमःशून्योघृताशीरचलाचलः ॥ १०७ ॥ अ
मानीमानदोमान्योलोकस्वामीत्रिलोकधृक् ॥ सुमेधामे

॥१४॥ धजोधन्यः सत्यधाधराधरः ॥१०८॥ तेजोवृषोद्युतिधरः सर्वशस्त्र
भृतांवरः ॥ प्रग्रहोनिग्रहोव्यग्रोनैकशृंगोगदाग्रजः ॥१०९॥
चतुर्मूर्तिश्चतुर्बाहुश्चतुर्व्यूहश्चतुर्गतिः ॥ चतुरात्माचतुर्भाव
श्चतुर्वेदविदेकपात् ॥ समावर्त्तोनिवृत्तात्मादुर्जयोदुरतिक्रमः
दुर्लभोदुर्गमोदुर्गोदुरावासोदुरारिहा ॥ शुभांगोलोकसारंगः
सुतंतुस्तंतुवर्द्धनः ॥ इंद्रकर्मामहाकर्माकृतकर्माकृतागमः ॥११२॥

॥१४॥

उद्भवः सुंदरः सुंदोरत्ननाभः सुलोचनः ॥ अर्क्कोवाजसनः शृंगी
जयंतः सर्वविज्जयी ॥११३॥ सुवर्णबिंदुरक्षोभ्यः सर्ववागीश्वरे
श्वरः ॥ महाह्रदोमहागर्त्तोमहाभूतोमहानिधिः ॥११४॥ कु
मुदः कुंदरः कुंदः पर्जन्यः पावनोनिलः ॥ अमृतांशोमृतव
पुः सर्वज्ञः सर्वतोमुखः ॥११५॥ सुलभः सुव्रतः सिद्धः शत्रुजि
च्छत्रुतापनः ॥ न्यग्रोधोदुंबरोश्वत्थः श्चाणूरांध्रनिषूदनः

॥१५॥ सहस्रार्चिः सप्तजिह्वाः सप्तैधाः सप्तवाहनः ॥ अमूर्त्तिरनघोऽचिंत्यो
भयकृद्भयनाशनः ॥११७॥ अनुर्वृहत्कृशःस्थूलोगुणभृन्निर्
गुणोमहान् ॥ अधृतः स्वधृतः स्वास्यः प्राग्वंशोवंशवर्द्धनः ॥
॥११८॥ भारभृत्कथितो योगी योगीशः सर्वकामदः ॥ आश्रमश्र
मणः क्षामः सुपर्णोवायुवाहनः ॥ ११९ ॥ धनुर्द्धरोधनु
र्वेदोदंडोदमयितादमः ॥ अपराजितः सर्वसहोनियंतानि

यमोयमः ॥ १२० ॥ सत्ववान्सात्विकः सत्यसत्यधर्मपरायणः ॥ अभि
प्रायः प्रियार्होर्हः प्रियकृत्प्रीतिवर्द्धनः ॥ १२१ ॥ विहायसगति
र्ज्योतिः सुरुचिर्हुतभुग्विभुः ॥ रविर्विरोचनः सूर्यः सवितार
विलोचनः ॥ १२२ ॥ अनंतोहुतभुग्भोक्ता सुखदोनैकदोग्र
जः ॥ अनिर्विण्णः सदामर्षी लोकाधिष्ठानमद्भुतः ॥ १२३ ॥
सनात्सनातनः तमः कपिलः कपिरव्ययः ॥ स्वस्तिदः स्वस्ति

कृत्स्वस्तिस्वस्तिभुक्स्वस्तिदक्षिणाः ॥ १२४ ॥ अरौद्रः कुंडलीचक्री
विक्रम्यूर्जितशासनः ॥ शब्दातिगः शब्दसहः शिशिरः शर्वरी
करः ॥ १२५ ॥ अक्रूरः पेशलो दक्षो दक्षिणः क्षमिणांवरः ॥
विद्वत्तमो वीतभयः पुण्यश्रवणकीर्तनः ॥ १२६ ॥ उत्तारणो
दुःकृतिहा पुण्यो दुःस्वप्ननाशनः वीरहा रक्षणः शांतो जीव
नः पर्यवस्थितः ॥ १२७ ॥ अनंतरूपो ऽनंतश्रीर्जितमन्युर्भया १६

पहः ॥ चतुरस्रो गभीरात्मा विदिशो व्यादिशो दिशः ॥ १२८ ॥ अना
दिर्भूर्भुवो लक्ष्मी सुवीरो रुचिरांगदः ॥ जननो जनजन्मादिर्भी
मो भीमपराक्रमः ॥ १२९ ॥ आधारनिलयो धाता पुष्पहासः
प्रजागरः ॥ ऊर्द्धगः सत्पथाचारः प्राणदः प्रणवः पृथु ॥ १३० ॥
प्रमाणं प्राणनिलयः प्राणभृत्प्राणजीवनः ॥ तत्वं तत्वविदे
कात्मा जन्ममृत्युजरातिगः ॥ १३१ ॥ भूर्भुवस्वस्तरुस्तारः सवि

१७ मु

नाथपितामहः॥ यज्ञोयज्ञपतिर्यज्वायज्ञांगोयज्ञवाहनः॥१३२॥ य
ज्ञभृद्यज्ञकृद्यज्ञीयज्ञभुग्यज्ञसाधनः॥ यज्ञांतकृद्यज्ञगुह्यम
न्नमन्नादिरेवच॥१३३॥ आत्मयोनिःस्वयंजातोवैखानःसामगा जा
यनः॥ देवकीनंदनःस्रष्टाक्षितीशःपापनाशनः॥१३४॥ शं
खभृन्नंदकीचक्रीशार्ङ्गधन्वागदाधरः॥ रथांगपाणिरक्षो
भ्यःसर्वप्रहरणायुधः॥१३५॥ इतिदेवकीनं नी दनस्यकेशवस्य

१७

मु

महात्मनः॥ नाम्नांसहस्रंदिव्यानामशेषेणप्रकीर्तितं॥१३६॥
यइदंशृणुयान्नित्यंयश्चापिपरिकीर्तयेत्॥ नाशुभंप्राप्नु
याक्किंचित्सोमुत्रेहचमानवः॥१३७॥ वेदांतगोब्राह्मणःस्या
त्क्षत्रियोविजयीभवेत्॥ वैश्योधनसमृद्धःस्यात्शूद्रः
सुखमवाप्नुयात्॥१३८॥ धर्मार्थीप्राप्नुयाद्धर्ममर्थार्थी
चार्थमाप्नुयात्॥ कामानवाप्नुयात्कामीप्रजार्थीप्राप्नुयात्प्र

॥१८॥

ताः ॥१३९॥ भक्तिमान्यःसदोत्थायशुचिस्तद्गतमानसः ॥ सहस्रं
वासुदेवस्यनाम्नामेतत्प्रकीर्त्तयेत् ॥ यशःप्राप्नोतिपुलंज्ञातिप्रा वि
धान्यमेवच ॥ अचलांश्रिमाप्नोतिश्रेयःप्राप्नोतिनुत्तमं ॥१४१॥
नभयंक्वचिदाप्नोतिवीर्यंतेजश्चविंदति ॥ भवत्यरोगोद्युतिमा
नवलरूपगुणान्वितं ॥१४२॥ रोगार्त्तोमुच्यतेरोगाद्बद्धोमु
च्येतबंधनात् ॥ भयान्मुच्येतभीतस्तुमुच्येतापन्नआ ॥१८॥

पदः ॥१४३॥ दुर्गाण्यतितरंत्याशुपुरुषःपुरुषोत्तमः ॥ स्तुवन्ना
विं२ मसहस्रेणनित्यंभक्तिसमन्वितः ॥१४४॥ वासुदेवाश्रयोमर्त्योवा
वा सुदेवपरायणः ॥ सर्वपापविशुद्धात्मायातिब्रह्मसनातनं
॥१४५॥ नवासुदेवभक्तानामशुभंविद्यतेक्वचित् ॥ जन्ममृ
त्युजराव्याधिभयंनैवोपजायते ॥१४६॥ इदंस्तवमधीया
नःश्रद्धाभक्तिसमन्वितः ॥ युज्येतात्मसुखक्षांतिश्रीधृतिः

॥१९॥ स्मरंति कीर्त्तिभिः ॥१४७॥ न क्रोधो न च मात्सर्यं न लोभो नाशुभा मतिः
भवंति कृतपुण्यानां भक्तानां पुरुषोत्तमे ॥१४८॥ द्यौः सचंद्रार्कन
क्षत्रा खं दिशो भूर्महोदधिः ॥ वासुदेवस्य वीर्येण विधृतानि महा
त्मनः ॥१४९॥ ससुरासुरगंधर्वं सयक्षोरगराक्षसं ॥ जगद्व
शे वर्त्ततेदं कृष्णस्य सचराचरं ॥१५०॥ इंद्रियाणि मनो बुद्धिः
सत्त्वं तेजो बलं धृतिः ॥ वासुदेवात्मकान्याहुः क्षेत्रं क्षेत्रज्ञमेव ॥१९॥

च ॥१॥ सर्वागमानामाचारः प्रथमं परिकल्पते ॥ आचारः प्रभवो ध
र्मो धर्मस्य प्रभुरच्युतः ॥२॥ ऋषयः पितरो देवा महाभूतानि धातवः
जंगमाजंगमं चेदं जगन्नारायणोद्भवं ॥३॥ योगो ज्ञानं तथा सां
ख्यं विद्याः शिल्पादि कर्म च ॥ वेदाः शास्त्राणि विज्ञानमेतत्स
र्वं जनार्दनात् ॥४॥ एको विष्णुर्महद्भूतं पृथग्भूतान्यनेकशः
त्रिलोकान्व्याप्य भूतात्मा भुंक्ते विश्वभुगव्ययः ॥५॥ इदं स्तवं भ

॥२०॥ गवतोविष्णोर्नाम्नांसहस्रकीर्त्तितं ॥ पठेद्यइच्छेत्पुरुषःश्रेयःप्राप्तुंसुखा
निच ॥ ६ ॥ विश्वेश्वरमजंदेवंजगतःप्रभवाव्ययं ॥ भजंतियेपु
ष्कराक्षंनतेयांतिपराभवम् ॥ ७ ॥ अर्जुनउवाच ॥ पद्मपत्रवि
शालाक्षपद्मनाभसुरोत्तम ॥ भक्तानामनुरक्तानांत्राताभव
जनार्दन ॥ ८ ॥ श्रीभगवानुवाच ॥ योमांनामसहस्रेणस्तोतु
मिच्छतिपाण्डवः ॥ सोहमेकेनश्लोकेनस्तुतएवनसंशयः ॥ ९ ॥ ॥२०॥

ॐनमोस्त्वनंतायसहस्रमूर्त्तयेसहस्रपादाक्षिशिरोरुबाहवे ॥
स्र सहस्रनाम्नेपुरुषायशाश्वतेसहस्रकोटीयुगधारिणेनमः ॥ १० ॥
नमःकमलनाभायनमस्तेजलशायिने ॥ नमस्तेकेशवानं
तवासुदेवनमोस्तुते ॥ ११ ॥ वासनाद्वासुदेवस्यवासितंभुवनत्र
यं ॥ सर्वभूतनिवासीनांवासुदेवनमोस्तुते ॥ नमोब्रह्मण्यदेवा
यगोब्राह्मणहितायच ॥ जगद्धितायकृष्णायगोविंदायनमो

२१ नमः ॥१३॥ आकाशात्पतितंतोयंयथागच्छतिसागरे ॥ सर्वदेवनम
स्कारंकेशवंप्रतिगच्छति ॥१४॥ एषनिष्कंटकःपंथायत्रसंपूज्यते
हरिः ॥ कुपथंतंविजानीयाद्गोविंदरहितागमं ॥१५॥ सर्ववेदे
षुयत्पुण्यंसर्वयत्फलंतत्फलंश्रियमाप्नोतिस्तुत्वादेवंजनार्द
नं ॥१६॥ योनरःपठतेनित्यंत्रिकालंकेशवालये ॥ द्विकालमे
ककालंवाक्रूरंसर्वंव्यपोहति ॥१७॥ दह्यंतेरिपवस्तस्यसौम्या २१

सर्वेसदाग्रहाः ॥ विलीयंतेचपापानिस्तवेह्यस्मिन्प्रकीर्तिते ॥१८॥
येनध्यातःश्रुतोयेनयेनायंपठ्यतेस्तवः ॥ दत्तानिसर्वदानानिसुरा नी
सर्वेसमर्चिताः ॥१९॥ इहलोकेपरेवापिनभयंविद्यतेक्वचि त्
नाम्नांसहस्रंयोधीतेद्वादश्यांममसंनिधौ [illegible] शनैर्दह
तिपापानिकल्पकोटिशतानिच ॥ अश्वत्थसन्निधौपा
र्थतत्वमानसिकेशवं ॥२१॥ पठेन्नामसहस्रंतुगवांकोटि

२२ फलं लभेत ॥ [illegible]वालये पठेन्नित्यं तुलसीवनसंस्थितः ॥ नरो
मुक्तिमवाप्नोति चक्रपाणिर्वचो यथा ॥ ब्रह्महत्यादिकं
पाप पापं सर्वं विनश्यति ॥ ६ ॥ श्री इति श्रीमहाभारते शतसा
हस्रसंहितायां वैयासिक्यां शांतिपर्वणि उत्तमानु